**2. मञ्जूषातः अव्ययपदानि चित्वा वाक्यानि पूरयत-**

| अलम् | अन्तः | बहिः | अधः | उपरि |
|---|---|---|---|---|

(क) वृक्षस्य उपरि खगाः वसन्ति।

(ख) अलम् विवादेन।

(ग) वर्षाकाले गृहात् बहिः मा गच्छ।

(घ) मञ्चस्य अधः श्रोतारः उपविष्टाः सन्ति।

(ङ) छात्राः विद्यालयस्य अन्तः प्रविशन्ति।

**3. अशुद्धं पदं चिनुत-**

(क) गमन्ति, यच्छन्ति, पृच्छन्ति, धावन्ति। गमन्ति

(ख) रामेण, गृहेण, सर्पेण, गजेण। गजेण

(ग) लतया, मातया, रमया, निशया। मातया

(घ) लते, रमे, माते, प्रिये। माते

(ङ) लिखति, गर्जति, फलति, सेवति। सेवति

**4. मञ्जूषातः समानार्थकपदानि चित्वा लिखत-**

| प्रसन्नतायाः | चिकित्सकम् | लब्ध्वा | शरीरस्य | दक्षाः |
|---|---|---|---|---|

प्राप्य — लब्ध्वा

कुशलाः — दक्षाः

हर्षस्य — प्रसन्नतायाः

देहस्य — शरीरस्य

वैद्यम् — चिकित्सकम्

5. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत-**

(क) मञ्चे कति बालकवयः उपविष्टाः सन्ति? चत्वार

(ख) के कोलाहलं कुर्वन्ति? श्रोतारः

(ग) गजाधरः कम् उद्दिश्य काव्यं प्रस्तौति? आधुनिकवैद्यम्

(घ) तुन्दिलः कस्य उपरि हस्तम् आवर्तयति? तुन्दस्य

(ङ) लोके पुनः पुनः कानि भवन्ति? शरीराणि

(च) किं कृत्वा घृतं पिबेत्? ऋणं

6. **मञ्जूषातः पदानि चित्वा कथायाः पूर्तिं कुरुत-**

| | | | | | |
|---|---|---|---|---|---|
| नासिकायामेव | वारंवारम् | खड्गेन | दूरम् | मित्रता | मक्षिका |
| व्यजनेन | उपाविशत् | छिन्ना | सुप्तः | प्रियः | |

पुरा एकस्य नृपस्य एकः प्रियः वानरः आसीत्। एकदा नृपः सुप्तः आसीत्।



वानरः व्यजनेन तम् अवीजयत्। तदैव एका मक्षिका नृपस्य नासिकायाम् उपाविशत्। यद्यपि वानरः वारंवारं व्यजनेन तां निवारयति स्म तथापि सा पुनः पुनः नृपस्य नासिकायामेव उपविशति स्म। अन्ते सः मक्षिकां हन्तुं खड्गेन प्रहारम् अकरोत्। मक्षिका तु उड्डीय दूरं गता, किन्तु खड्गप्रहारेण नृपस्य नासिका छिन्ना अभवत्। अत एवोच्यते- "मूर्खजनैः सह मित्रता नोचिता।"

VIII C

7. **विलोमपदानि योजयत-**

| | |
|---|---|
| 1· अधः | 4· नीचैः |
| 2· अन्तः | 5· सुलभम् |
| 3· दुर्बुद्धे! | 1· उपरि |
| 4· उच्चैः | 2· बहिः |
| 5· दुर्लभम् | 3· सुबुद्धे! |

## ध्यातव्यम्



अस्मिन् पाठे अधः, अन्तः, बहिः, नीचैः, पुनः इत्यादीनि अव्ययपदानि सन्ति। एषां त्रिषु लिङ्गेषु, त्रिषु वचनेषु सर्वासु विभक्तिषु च एकमेव रूपं भवति, विकारो न जायते।

उक्तञ्च-

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।